दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-102

1

04.02.2024 रविवासरः वि.सं. २०८० माघकृष्ण नवमी माघ २१ प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 ई-वाहनानां उपयोगेन २८ लक्षरूप्यकाणां रक्षणं जातम् हरित ऊर्जाराज्यस्य निर्माणार्थं प्रयत्नाः



भारतस्य यशस्वी जायसवालस्य द्विशतकम्। जसप्रीत बुमराहस्य षट् स्तोभाः,

3



लङ्काकाण्डम्! (द्विषष्टितमः सर्गः) पुष्पकविमानेन श्रीरामचन्द्रस्य अयोध्यायात्रा, भरद्वाजगुहादिभिः सह च साक्षात्कारः। (अष्टमः खण्डः) 4



## आकाशवाणीवार्ताः

### भारतस्य जी-विशंति समूहस्य अध्यक्षता राष्ट्रस्य राजनीतिगत-ऐतिह्यस्य एकः महत्वपूर्णावसरः-विदेशमन्त्री डॉ. एस. जयशंकरः



विदेशमन्त्री डॉ. एस. जयशंकरः कथितवान् यत् भारतस्य जी-विशंति समूहस्य अध्यक्षता राष्ट्रस्य राजनीतिगत-ऐतिह्यस्य एकः महत्वपूर्णावसरो विद्यते । समूहस्य लब्ध-उपलब्धिनाञ्च व्यापिका प्रशंसा जाता। ह्यः नवदिल्ल्याः 'इण्डिया एण्ड द फ्यूचर ऑफ द जी-विशंति नामधेयकस्य पुस्तकस्य विमोचनावसरे श्रीजयशंकरः समुदीरितवान् यत् राष्ट्रेण जी-विशंति इत्येतस्य समूहस्य अध्यक्षतावधौ विकासशील देशानां कल्याणं ध्याने स्थापितम्। डॉ. जयशंकरः अत्रावसरे अभिव्यक्तवान् यत् राष्ट्राय गर्वस्य वार्तास्ति यतो हि राष्ट्रेण जी-विंशति अध्यक्षतावधौ बहुपक्षीय-व्यवस्थास्थापकानां- हरितविकाससन्धि-स्थूलान्नप्रसङ्ग-आङ्कीयसंरचना-महिलानेतृत्व-विषयान् समेत्य अनेके विषयाः सम्मिलताः कृता।

### जम्मू-कश्मीरे हिमाचल प्रदेशे च केषुचित् स्थानेषु तीव्रा वृष्टिः हिमपातश्च

ऋतु विभागेन प्रोक्तं यत् अद्यप्रभृतिः नवीनः पश्चिमीयः विक्षोभः प्रारभ्यते। अस्य प्रभावेण आगामिनि द्विदिवसयोः जम्मू-कश्मीरे हिमाचल प्रदेशे च केषुचित् स्थानेषु तीव्रा वृष्टिः हिमपातश्च भवितुम् अर्हति। अद्य जम्मू-कश्मीर- हिमाचल-प्रदेश- उत्तराखण्ड- पंजाब- चण्डीगढ़- हरियाणा- पश्चिम-उत्तर-प्रदेशेषु हिमवृष्टिः-सम्भाव्यते। हरियाणा-दिल्ली-पंजाब-राजस्थान प्रदेशेषु अद्य श्वः च वृष्टिः सम्भाव्यते। उत्तर-प्रदेशे रविवासरे सोमवासरे च वर्षा सम्भाव्यते। अद्य पंजाब-हरियाणा-चण्डीगढ दिल्ली-क्षेत्राणि प्रातः गहन-कुज्झटिकया आच्छादितानि आसन्। बिहार-मध्य-प्रदेश-झारखण्ड-ओडिशा-प्रदेशाः अपि अद्य कुज्झटिकया आच्छादिताः आसन्। अत्रान्तरे रेल-मन्त्रालयेन ज्ञापितं यत् दिल्ली आगच्छन्ती सप्तदश-रेलयानानि विलम्बेन चलन्ति।

# लालकृष्ण आडवाणी इत्यस्मै प्रदास्यते देशस्य सर्वोच्च-सम्मानः भारत-रत्न-पुरस्कारः

नवदेहली। भारतीय जनता पार्टीति दलस्य वरिष्ठनेत्रे लालकृष्ण आडवाणी इत्यस्मै देशस्य सर्वोच्च-सम्मानः भारत-रत्न पुरस्कारः प्रदास्यते। एकस्मिन् सामाजिक-सन्देश-अन्तर्जालपटले प्रधानमन्त्री नरेन्द्रमोदी लिखितवान् यत् असौ श्री-आडवाणी-इत्यनेन सह वार्ता अथ च अत्रावसरे तस्मै शुभकामनाः प्रदत्तवान्। प्रधानमन्त्री कथितवान् यत् भाजपेतिदलस्य वरिष्ठनेतुः भारतस्य विकासे योगदानं अविस्मरणीयमस्ति सहैव श्री-आडवाणी प्रवर्तमाने समये एकः सम्मानितः राजनेतास्ति। असौ अग्रे निगदितवान् यत् श्रीआडवाणीवर्यस्य जीवनं भूमिस्तरतः उपप्रधानमन्त्रित्वं यावत् देश-सेवायै समर्पितम् आसीत्। प्रधानमन्त्री प्रावोचत् यत् श्रीआडवाणीवर्यः देशाय गृह-सूचनाप्रसारण-मन्त्रि-पदयोः रूपेण सेवां प्रदत्तवान्। तस्य च संसदीय जीवनम् अनुकरणीयं समृद्ध-अन्तर्दृष्टियुतमस्ति। प्रधानमन्त्री पुनः अकथयत् यत् श्रीआडवाणीवर्यस्य दशाधिकवर्षाणां पारदर्शितां ऐक्यतां च प्रति अकाट्य- निष्ठायाः उदाहरणम् अस्ति। श्री-आडवाणीवर्यः राजनीतिक-नैतिकता-प्रसङ्गेऽपि अनुकरणीय- मानकं स्थापितवान् सहैव राष्ट्रिय ऐक्य-भावस्य सांस्कृतिकस्य च पुनरुत्थाने प्रयासं विहितवान्। भारतरत्नमिदं तस्मै प्रदीयमानं भावयुतं क्षणमस्ति।



### सूचनाप्रसारणमन्त्रिणा प्रदत्ताः शुभकामनाः

सूचना-प्रसारण-मन्त्री अनुराग ठाकुरः भारतीय जनता पार्टीति-दलस्य वरिष्ठ-नेत्रे लाल- कृष्ण-आडवाणीति-अस्मै राष्ट्रस्य जनतायाश्च दशकपर्यन्तं सेवायै भारत-रत्नेन सम्मानिते सति शुभकामनाः दत्तवान्। सः एकस्मिन् सन्देशे प्रोक्तवान यत् देशस्य विकास-यात्रायां श्री-आडवाण्याः कार्याणि अपूर्वाणि सन्ति। सः देशाय राजनैतिक-सांस्कृतिक-एकतायाः स्थायि-अभिज्ञानं समर्पितवान्।

## समस्यासु न्याय-प्रणाली आधुनिकी न्यायप्रदा भवेत्-प्रधानमन्त्री



प्रधानमन्त्रिणा नरेन्द्र-मोदिना प्रोक्तं यत् एकाविंशति-शताब्धाः सम्मुख समस्यानां स्पर्धा विंशति-शताब्धाः न अपितु नवीनेन चिन्तनेन परिष्कारेण च सम्भवति। शनिवासरे नवदिल्ल्यां राष्ट्रमण्डल-देशानां महान्यायवादीनां 'सॉलिसिटर जनरल' इत्येषां च सम्मेलने असौ अवदत् यत् समस्यासु न्याय-प्रणाली आधुनिकी न्यायप्रदा भवेताम्। अस्माकम् व्यवस्था अधिका सुगमतया स्वीकार्या स्यात्। अवसरेऽस्मिन् विधि मंत्री अर्जुन राम मेघवालः-प्रोक्तवान् यत् प्रविधिना विश्व-समूहः युक्तः। अद्यतन्याः वैश्विक समस्यायाः समाधानमपि वैश्विक स्तरेण भाव्यम्। अस्य कृते सम्बद्धाः पक्षाश्च मिलित्वा कार्यं करिष्यन्ति।

## ओडिशायाः सम्बलपुरे अष्टषष्टि-सहस्रकोट्यधिकानां रूप्यकाणां विकासात्मक परियोजनानां उद्घाटनम्



प्रधानमन्त्रिणा ओडिशायाः सम्बलपुरे अष्टषष्टि-सहस्रकोट्यधिकानां रूप्यकाणां विभिन्नानां विकासात्मक परियोजनानां उद्घाटनं कृतम्। श्रीमोदी अत्रावसरे ऊर्जा-मार्ग-रेल- संरचना-परियोजनाः उद्घाटितवान्। सहैव सम्बलपुरस्य आई.आई.एम. संस्थानस्य द्विअधिक- चतुश्शतकोटिरूप्यकाणां स्थायि-परिसरस्यापि उद्घाटनं कृतवान्। श्रीमोदिना पुरीतः-सोनेपुरंतः-पुरी-इत्यस्य साप्ताहिकं द्रुतरेलयानमपि हरितध्वजः प्रदर्शितः रेलयानमिदं तटीय-पश्चिमीय-ओडिशा-क्षेत्रयोः मध्ये संयोजनाय सौविध्यप्रदानं करिष्यति। प्रधानमन्त्रिणा श्रीमोदिना झारसुगुड़ा-मुख्य-प्रैष्य-कार्यालयः राष्ट्राय समर्पितः। अत्रावसरे ओडिशायाः राज्यपालः रघुबरदासः मुख्यमन्त्री नवीनपटनायकः केन्द्रीयमन्त्री धर्मेन्द्रप्रधानः अश्विनी वैष्णवः च उपस्थिताः आसन्।

## प्रमुखाः वार्ताः

### HP NEWS: HRTC इत्यस्य २५० मार्गाः हिमपातेन प्रभाविताः



हिमसंस्कृतवार्ताः,नरेशमलोटिया

हिमाचले वर्षायाः हिमपातस्य च कारणेन अद्यापि प्रायः २५० मार्गेषु हिमाचलमार्गपरिवहननिगमस्य बससेवाः प्रभाविताः सन्ति । एतदतिरिक्तं प्रायः ५० बसयानानि हिमपातेन अटन्ति । उच्चशिमला-नगरस्य मार्गाः हिमपातस्य कारणेन सर्वाधिकाः प्रभाविताः अभवन् । राज्ये हिमपातकारणात् अवरुद्धमार्गान् उद्घाटनेनसह हिमाचलमार्गपरिवहन-बसमार्गाणां पुनर्स्थापनं क्रियते। हिमाचलप्रदेशमार्गपरिवहननिगमस्य अनुसारं उच्चशिमलायां अधिकतमसङ्ख्यायां बसयानानि अटन्ति। अत्र बहूनि बसयानानि सन्ति ये अर्धमार्गेषु अटन्ति। एच् आर टी सी इत्यस्य अतिरिक्तानि निजीबसयानानि अपि हिमपातस्य कारणेन स्वमार्गेषु न प्रचलन्ति । राज्यस्य चम्बा, पाङ्गी, भरमौर, केलाङ्ग, रोहताङ्ग, मनाली, शिमला, किन्नौर इत्यादिषु अनेकेषु मार्गेषु बससेवाः प्रभाविताः । एचआरटीसी इत्यस्य शिमलाविभागस्य अधिकांशमार्गाः स्थगिताः अभवन् । गतगुरुवासरात् राज्ये हिमपातः वर्षा च निरन्तरं वर्तते। राज्यस्य अधिकांशक्षेत्रेषु वर्षा-हिमपातयोः कारणात् वाहनानां गमनम् स्थगितम् अस्ति ।

### सुभाषितम्

हिमसंस्कृतवार्ताः

सन्तोषः परमं सौख्यं
सन्तोषः परममृतम् ।
सन्तोषः परमं पथ्यं
सन्तोषः परमं हितम् ॥

भावार्थ- संतोष, यह परम् सौख्य, परम् अमृत, परम् पथ्य और परम् हितकारक है ।

प्रतीकसाठ्ये मुम्बई

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

# ई-वाहनानां उपयोगेन २८ लक्षरूप्यकाणां रक्षणं जातम्

## हरित ऊर्जाराज्यस्य निर्माणार्थं प्रयत्नाः परिणामं दर्शयन्ति-मुख्यमंत्री सुखविन्दरसिंहसुक्खुः






**हिमसंस्कृतवार्ताः-शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् परिवहनविभागे १९ विद्युत्वाहनानां उपयोगेन एकवर्षस्य अल्पे काले २८ लक्षं ३२ सहस्रं ८५३ रुप्यकाणां रक्षणम् अभवत्। विभागे ई-वाहनानां उपयोगेन कार्बन उत्सर्जने ८७.३१८ टनपर्यन्तं महती न्यूनता अभवत्। २०२६ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं हिमाचलप्रदेशं हरित ऊर्जाराज्यं कर्तुं राज्यसर्वकारस्य प्रयत्नाः सकारात्मकं परिणामं प्राप्नुवन्ति। एकवर्षपूर्वं परिवहनविभागे १९ ई-वाहनानि समाविष्टानि आसन्। अनेन न केवलं धनस्य रक्षणम् अपितु पर्यावरणसंरक्षणमपि सुनिश्चितम् अभवत्। मुख्यमन्त्री उक्तवान् यत् परिवहनविभागः देशे प्रथमः विभागः अस्ति यः ई-वाहनानि स्वीकरोति। गतवर्षस्य फेब्रुवरी-मासस्य ३ दिनाङ्के परिवहनविभागाय १९ ई-वाहनानि प्रदत्तानि आसन्। राज्यसर्वकारः हरित ऊर्जाराज्यस्य अवधारणां साकारं कर्तुं राज्ये ई-गतिशीलतां प्रवर्धयन् सततविकासं सुनिश्चितं कुर्वन् अस्ति। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः परिवहनक्षेत्रस्य सुदृढीकरणाय, नगरक्षेत्रेषु वायुप्रदूषणस्य निवारणाय च प्रतिबद्धः अस्ति। कार्बनपदचिह्नस्य न्यूनीकरणेन जनानां स्वास्थ्ये अपि सकारात्मकः प्रभावः भविष्यति। राज्यसर्वकारः हरित-गतिशीलतायाः आधारभूतसंरचनाः अपि सुदृढां कुर्वन् अस्ति। अस्य वित्तवर्षस्य अन्ते यावत् षट् हरितवीथयः सज्जाः भविष्यन्ति। राज्यसर्वकारेण ६८० कोटिरूप्यकाणां प्रावधानेन राजीवगान्धी स्वरोजगारप्रारम्भयोजना आरब्धा। अस्याः योजनायाः प्रथमचरणे अनुद्योगी-युवभ्यः ई-टैक्सी-क्रयणे ५० प्रतिशतं अनुदानं प्रदत्तं भवति। एतानि ई-टैक्सी-यानानि चालयितुं संचालकाः सर्वकारेण सह सहमताः सन्ति। युवभ्यः जीविकाप्रदानस्य सङ्गमेन ई-वाहनानां संचालनमपि बृहत्प्रमाणेन प्रोत्साहनं क्रियते।

### राज्यस्य अन्यानि राज्याणि हिमाचलप्रदेशात् प्रेरितानि भवन्ति

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारस्य उद्देश्यम् आयातितजीवाश्म-ईन्धनस्य उपरि निर्भरतां न्यूनीकर्तुं वर्तते, येन तस्मिन् व्ययितधनं जनकल्याणकार्येषु उपयोक्तुं शक्यते। राज्यसर्वकारः राज्यस्य पारिस्थितिकी रक्षन् पर्यावरणसौहृदयानस्य प्रचारं कुर्वन् अस्ति। देशस्य अन्यराज्यानि अपि एतत् उपक्रमं स्वीकर्तुं प्रेरिताः सन्ति।

# बद्दी-अग्निघटनायाः विषये मुख्यमंत्री दुःखं प्रकटितवान्,

## सोलनस्य अतिरिक्त-उपायुक्तस्य अध्यक्षतायां निरीक्षणाय उच्चस्तरीयं निर्देशं दत्तवान्





**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोलनजनपदस्य नालागढक्षेत्रस्य झाड़माजरी इत्यत्र स्थिते निजसंयन्त्रे अग्निघटनायां शोकं प्रकट्य सोलनस्य अतिरिक्त- उपायुक्तस्य अध्यक्षतायां निरीक्षणाय उच्चस्तरीयं निर्देशं दत्तवान्। अस्य अन्वेषणस्य नेतृत्वं एडीसी सोलन् करिष्यति। अस्मिन् विशेषनिरीक्षणदलद्वारा कृतानि सर्वेषां तथ्यानाम् अपि अन्वेषणं क्रियते। एडीसी सोलनम् निजी-उद्योगे कार्यं कुर्वतां कर्मचारिणां, आहतानाम्, तत्रत्यानां जनानां च अन्यैः सह सम्पूर्णविषये सर्वाणि तथ्यानि अन्वेषयिष्यति।

### परिवारेभ्यः सर्वसम्भवं सहायतां दातुं निर्देशाः

मुख्यमन्त्री जिलाप्रशासनम् एतस्य घटनायाः अन्वेषणं कृत्वा प्रभावितपरिवारेभ्यः सर्वसम्भवं सहायतां कर्तुं निर्देशं दत्तवान्। सः क्षतिग्रस्तानां शीघ्रं स्वास्थ्यलाभम् अकामयत्। अस्मिन् प्रसङ्गे मृतानां परिवारेभ्यः शोकं प्रकटयन्, दिवंगतानां प्राणानां शान्तिं प्रार्थितवान्।

## नूतनसंस्कृतप्रविधिभिः संस्कृतं पठिष्यन्ति विद्यालयीयाः छात्राः

# मण्ड्यां सेवारतानां संस्कृत-शिक्षकाणां पञ्चदिवसीया कार्यशाला सोत्साहेन सम्पन्ना



**हिमसंस्कृतवार्ताः-मण्डी।**
लघ्वीकाश्यां मण्ड्यां संस्कृतशिक्षकाणां पञ्चदिवसीय- क्षमतानिर्माणप्रशिक्षणकार्यशाला शनिवासरे सम्पन्ना। अस्याः कार्यशालायाः सुचारुसञ्चालनस्य विषये प्रसन्नतां प्रकटयन् उपनिदेशकः उच्च एवं प्रारम्भिक शिक्षा अमरनाथ राणा इत्यनेन उक्तं यत् इयं कार्यशाला संस्कृतमाध्यमेन सम्पन्ना एतत् प्रशंसनीयं वर्तते एतदर्थं प्रशिक्षकाः शिक्षकाः च अभिनन्दनीयाः सन्ति। जिलाशिक्षकप्रशिक्षणप्रभारी कमलेश महाजन अवदत् यत् अस्यां कार्यशालायां नूतनशिक्षानीत्यानुसारं स्वशिक्षणविधौ गुणवत्ताम् आनेतुं संस्कृतशिक्षकाणां प्रशिक्षणं क्रियते। कार्यशालायां विशेषतया हिमाचले देवभूमौ संस्कृतभाषायाः विषये विशेष बलं देयमस्ति, तत्सहितं संस्कृतं माध्यमभाषारूपेण स्वीकर्तुं बलं दत्तम्। कार्यशालायाः प्रभारी विजय शर्मा अवदत् यत् परिवर्तनशीलसमयेन सह संस्कृतभाषाशिक्षणस्य पद्धतयः परिवर्तयितव्याः भविष्यन्ति, येन समाजस्य मुख्यधारायां संस्कृतस्य अधिकं स्थानं भवेत्। भारतीयसंस्कृतेः तत्वं ज्ञातुं संस्कृतस्य ज्ञानम् अनिवार्यं वर्तते। संस्कृतं विना अस्माकं संस्कृतिः नास्ति। असौ अकथयत् यत् प्रथमवारं संस्कृतमाध्यमेन संस्कृतप्रशिक्षणं दृष्ट्वा अहं बहुसन्तुष्टास्मि। ज्ञातव्यं यत् मण्डीजनपदस्य २५ शिक्षाखण्डेभ्यः नवमदशम्याः ५१ संस्कृतशिक्षकाः विशेषतया अस्यां कार्यशालायां भागं गृहीतवन्तः। तत्रैव स्रोतव्यक्तिरूपेण डॉ. मनोजकुमारशैलः, डॉ. सेवकरामः, डॉ. मनोहरलालः, शास्त्री नरेन्द्रकुमारः, शास्त्री हंसराजसांख्यायनः भागं ग्रहीतवन्तः। कार्यशालायाः अन्तिमे दिने सर्वैः शिक्षकैः गणशः पाठ्योपकरणानां निर्माणम् कृत्वा तस्य प्रदर्शनमपि कृतम्। प्रशिक्षणप्राप्तैः शिक्षकैः स्वानुभवाः अपि प्रकटिताः किञ्च अमूल्याः परामर्शाः अपि प्रदत्ताः।

# हिमाचलपथपरिवहननिगमस्य ८०० मार्गे बससेवा प्रभाविता; स्खलनस्य कारणेन बसयानानि मध्यमार्गे स्थगितानि, शतशः मार्गाः प्रभाविताः





**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** राज्ये प्रचण्डवृष्ट्या हिमपातेन च हिमाचलपथपरिवहननिगमस्य ८०० मार्गेषु बससेवाः प्रभाविताः अभवन्। हिमाचलपथपरिवहननिगमस्य अतिरिक्तं निजीबसयानानि अपि स्वमार्गेषु गन्तुं न शक्तानि। शिमलाजनपदे २०० तः अधिकाः मार्गाः प्रभाविताः सन्ति। उच्चशिमलायाः मार्गाः हिमपातस्य कारणेन सर्वाधिकं प्रभाविताः अभवन्। एचआरटीसी इत्यस्य अनुसारम् अधिकांश-बसयानानि उपरि शिमलायां निरुद्धानि। अत्र बहूनि बसयानानि सन्ति ये अर्धमार्गेषु निरुद्धानि। एतदतिरिक्तं चम्बा, पाङ्गी, भरमौरं, केलाङ्गं, रोहताङ्गं, अटलकन्दरा, मनाली, डलहौजी, शिमला, किन्नौरं इत्येतेषां परितः अनेकमार्गेषु बससेवाः प्रभाविताः सन्ति। एचआरटीसी-शिमला-मण्डलस्य ५९ मार्गाः स्थगिताः, ५२ मार्गाः च अवरुद्धाः सन्ति।
एतदतिरिक्तं रिकोङ्गपियोनिगमस्य २४ मार्गाः स्थगिताः, त्रिमार्गाः च अवरुद्धा सन्ति। तारादेव्याः मार्गद्वयं स्थगितम्, तारादेवी-नेरवायाः ८५ मार्गाः स्थगिताः, १८ मार्गाः च अवरुद्धा अभवन्। रोहडूनिगमस्य २१ मार्गाः स्थगिताः पञ्च मार्गाः निरुद्धाः, रामपुरस्य १३ मार्गाः स्थगिताः सप्त मार्गाः निरुद्धाः, ककसोगस्य सप्त मार्गाः स्थगिताः, शिमलानगरस्य ग्रामीणक्षेत्रेषु ४३ मार्गाः स्थगिताः, १७ मार्गाः निरुद्धाः च सन्ति। एतदतिरिक्तं सोलननगरं प्रति दशमार्गाः स्थगिताः, द्वौ मार्गौ च निरुद्धौ स्तः। राज्यस्य मनाली केलाङ्गं, डलहौजी, पाङ्गी, भरमौरं, किन्नौरं, रोहताङ्ग इत्यत्र अटल कन्दरायाः च परितः, मनाली, शिमला इत्यस्य उपरितनक्षेत्रेषु गुरुवासरात् आरभ्य यातायातस्य गतिः स्थगिता आसीत्।

### उच्चोच्चक्षेत्रेषु जीवनं स्थगितम् अभवत्

हिमाचलमार्गपरिवहननिगमस्य ८०० मार्गेषु बससेवाः प्रभाविताः सन्ति। राज्यस्य अनेकक्षेत्रेषु बह्वीषु स्थानेषु निजीबसयानानि अपि अटन्ति स्म। बसयानानां न प्रचलनेन जनानां समस्यानां सामना कर्तव्यः आसीत्। राज्यस्य उच्चोच्चक्षेत्रेषु हिमपातस्य कारणेन स्खलितमार्गाणां कारणेन बसयानानि न चालितानि आसन्।

# भारतस्य यशस्वी जायसवालस्य द्विशतकम्।

## जसप्रीत बुमराहस्य षट् स्तोभाः, भारतेन इंग्लैंडदलस्य प्रथमा पाली 253 धावनांकेषु पूरिता, द्वितीयपाल्यां भारतेन कृताः 28 धावनांकाः




हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा
भारत- इंग्लैंडदशयोः मध्ये जायमानायाः टेस्ट- क्रिकेट- श्रृंखलायाः द्वितीयप्रतिस्पर्धायां द्वितीये दिने भारतस्य पाली षट् क्रीडकहानौ 336 धावनांकेभ्यः अग्रे समारब्धा। यशस्वी जायसवालेन शीघ्रमेव स्वकीयं प्रथमं द्विशतकम् पूरितम्। तेन 290 कन्दुकेषु 209 धावनांकाः अर्जिताः। रविचंद्रन अश्विनश्चापि 20 धावनांकान् अर्जितवान्। भारतस्य प्रथमा पाली 396 धावनांकेषु समाप्ता। कन्दुकक्षेपणे इंग्लैंडपक्षतः शोएब बशीरः, रिहान अहमदः, जेम्स एंडरसनश्च 3-3, टॉम हार्टले च 1 स्तोभं गृहीतवन्तः। इंग्लैंडदलस्य प्रथमपाल्यां जैक क्राउली 76, बेन स्टोक्सः 47, ओली पॉपः 23, बेन डकेटः 21, टॉम हार्टले 21, जॉनी बेयरस्टो च 25 धावनांकान् योजितवन्तः। इंग्लैंडदलस्य प्रथमा पाली 253 धावनांकेषु एव समाप्ता। कन्दुकक्षेपणे जसप्रीत बुमराहः इंग्लैंडदेशस्य षट् क्रीडकान् बाधितवान्। कुलदीप यादवः 3, अक्षर पटेलश्च 1 स्तोभं प्राप्तवान्। दिवसान्ते भारतेन द्वितीयपाल्यां 28 धावनांकाः अर्जिता आसन्। रोहित शर्मा 13, यशस्वी जायसवालश्च 15 धावनांकेषु अविजितौ आस्ताम्। भारतस्य पार्श्वे 171 धावनांकानाम् अग्रता अस्ति।

चलचित्रवार्ताः

# 'भूल भुलैया ३' चलचित्रे कार्तिकेन सह सारा अभिनयं न करिष्यति अपितु शर्वरी अभिनयं करिष्यति



हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।
अनीस बज्मी इत्यनेन निर्देशने निर्मित-भूल भुलैया ३ इति चलचित्रं बहुकालात् वार्तायां वर्तते। अस्मिन् कार्तिक आर्यनः मुख्यभूमिकायां दर्शनं दास्यति। अधुना एव कार्तिकः चंदू चैंपियन इति चलचित्रस्य चित्रोतलनं समाप्तं कृतवान्। शीघ्रमेव 'भूल भुलैया 3' इत्यस्य चित्रोतलनम् आरम्भं करिष्यति। भूल भुलैया ३ इत्यस्य विषये चिरकालात् नूतनाः वार्ताः आगच्छन्ति। चलचित्रस्य नायिकायाः विषये निरन्तरं वार्ताः आगच्छन्ति। भूल भुलैया २ इत्यस्मिन् चलचित्रे कार्तिक आर्यनः इत्यनेन सह कियारा आडवाणी मुख्यभूमिकायां दृश्यते स्म। यदा भूल भुलैया ३ इत्यस्मिन् कियारा इत्यस्याः स्थाने सारा अली खानस्य उपस्थितिः इति वार्ता आगता आसीत्। अधुना च वार्ता आगच्छति यत् भूलभुलैया ३ इत्यस्मिन् चलच्चित्रे कार्तिकेन सह सारा, कियारा न अपितु शर्वरी वाघः दृश्यते। प्राप्तसमाचारानुसारं चलचित्रनिर्मातारः शर्वरी वाघेन सह वार्तालापं कुर्वन्ति। शर्वरी इत्यनया चलचित्रस्य 'लुक टेस्ट' इति अपि दत्ता अस्ति। यदि सर्वं सम्यक् भवति तर्हि शर्वरी वाघः भूलभुलैया ३ इत्यस्मिन् नायिकायाः भूमिकायां दृश्यते।

# ज्ञानसागर विद्यालयस्य बालकाः कलात्मकप्रतिभाभिः परिपूर्णाः सन्तिः- डॉ. आशुतोष शरणः




हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी
अगरवानगरे स्थितः ज्ञानसागर- पब्लिक- विद्यालयः न केवलं शिक्षायाः अपितु सांस्कृतिकविकासाय अपि प्रमुखकेन्द्रम् अस्ति। यत्र बालकेषु सामाजिक- सांस्कृतिक- जीवन-मूल्यानां प्रवर्तनं भवति, तत्र अस्य कारणात् अत्रत्याः छात्राः बहुमुखीप्रतिभायाः समृद्धाः सन्ति, ये विद्यालयपरिसरं त्यक्त्वा सर्वकारे उच्चपदं धारयन्ति। सुप्रसिद्ध हृदय वैद्यः, कलाप्रेमी च डॉ. आशुतोषशरणः ज्ञानसागरपब्लिकविद्यालयस्य वार्षिकमहोत्सवस्य सांस्कृतिककार्यक्रमस्य च उद्घाटनानन्तरम् अद्य स्वसम्बोधने एतत् अवदत्। समारोहस्य मुख्यातिथिः भारतसर्वकारस्य संस्कृतिमन्त्रालयस्य राज्यपालमण्डलस्य सदस्यः प्रसाद रत्नेश्वरः अवदत् यत्कलामाध्यमेन भक्तिं प्रदातुम् अस्माकं परम्परा अस्ति, अस्मिन् ज्ञानसागरविद्यालयस्य बालकलाकाराः सज्ञाः दृश्यन्ते। अस्मिन् अवसरे संजय उपाध्यायः भारतीयमूल्याधारितपत्रकारितायाः कृते अतिथिभिः ज्ञानसागरसम्मानेन अलङ्कृतः निजीविद्यालयसंघस्य जिलाध्यक्षः राहुल गुप्ता, जिलासचिवः राजीव रंजनः, विद्यालयस्य शिक्षकाः ओम प्रकाशसिंहः, गजेन्द्र यादवः, राजीव पाण्डेयः, सुषमा श्रीवास्तवः, अभिषेक सिंहः, रानी सिंह , संगीता सिंह, संजय कुमारः, सबीहा कौशर, अलिशा परवीन, ताहिर हुसैनः, मु. शमीम अख्तर, अन्तिमा कुमारी, कृष्णा द्विवेदीः, शिवम कुमारः आदयः ज्ञानभारती पुरस्कारकात् सम्मानिताः अभवन्। समारोहस्य अध्यक्षता विद्यालयस्य प्राचार्यः डॉ धर्मेंद्र मिश्रा अकरोत्। सांस्कृतिकप्रस्तुतिषु देवाश्री गणेशः, राधा तेरी चुनरी, वो कृष्णा है, सुस्वगतम्, कृष्णलीला च इण्डियावाले नृत्यानि आसन्। विद्यालयस्य छात्रा रियारानी, माहीकुमारी, हंसिका, अनन्या, अंकितः, प्रियांशुः, आर्यनः, आदयः यत् प्रस्तुतिः प्रशंसनीयाः आसन्। धन्यवादज्ञापनं विद्यालयनिर्देशकः अनवर हुसैनः अकरोत्।

# के. के. पाठकस्य घोषणां, एकवारं पुनः बिहारे शिक्षकानां महत्पुनर्स्थापनं भविष्यति, अतः तृतीयचतुर्थचरणयोः बहवः शिक्षकाः नियुक्ताः भविष्यन्ति




हिमसंस्कृतवार्ताः- कुणाल कौशिकः , मोतिहारी
पुनः एकवारं बिहारे शिक्षकप्रत्याशिनां बम्पर भरणं भविष्यति। के के पाठकः पुनः एकवारं शिक्षकाभ्यर्थीनां कृते महती वार्ताम् आनयत्। अस्मिन् वर्षे एकलक्षाधिकपदेषु शिक्षकानां नियुक्तिः भविष्यति। सूचनानुसारं तृतीयचरणस्य ७० सहस्रपदेषु शिक्षकानां नियुक्तिः भविष्यति। चतुर्थे चरणे एकलक्षाधिकाः शिक्षकाः नियुक्ताः भविष्यन्ति। वस्तुतः शिक्षाविभागस्य अतिरिक्तमुख्यसचिवः के. के. पाठकः किशनगञ्जे एतस्य घोषणां कृतवान्। के. के पाठकेन शुक्रवासरे किशनगञ्जजिलायाः शिक्षकप्रशिक्षणसंस्थानस्य निरीक्षणकाले प्रशिक्षुभ्यः एषा सूचना दत्ता। शिक्षाविभागेन तृतीयचरणस्य शिक्षकनियुक्तेः सज्जता आरब्धा। अस्मिन् मासे (फरवरी) तृतीयचरणस्य नियुक्तेः विज्ञापनं प्रकाशितं भविष्यति। मार्चमासतः मईमासपर्यन्तं कदापि परीक्षां कर्तुं शक्यते। विभागात् प्राप्तसूचनानुसारं तृतीयचरणस्य प्रायः ७० सहस्राणि पदानि नियुक्तानि भविष्यन्ति। शेषपदानां नियुक्तिः चतुर्थे चरणे भविष्यति। तृतीयचरणस्य विषये विभागेन सर्वेभ्यः मण्डलेभ्यः रिक्तपदानां विषयवारं अद्यतनसूची याचिता। शीघ्रमेव सामान्यप्रशासनविभागस्य माध्यमेन बिहार लोकसेवा आयोगाय आग्रहः प्रेषितः भविष्यति। तृतीयचतुर्थचरणयोः शिक्षकनियुक्तिः अपि आयोगद्वारा भविष्यति। ज्ञायते यत् नियुक्तेः द्वितीयचरणस्य १५ सहस्र- अभ्यर्थीनां पूरकपरिणामानां प्रकाशनस्य निर्णयः आसीत्, यः पश्चात् स्थगितः अभवत्। एतानि १५ सहस्राणि पदानि अपि अधुना तृतीयचरणस्य नियुक्तौ समाविष्टानि भविष्यन्ति। एतस्य अनन्तरम् अपि ये पदाः रिक्ताः सन्ति ते अगस्तपरीक्षायां समाविष्टाः भविष्यन्ति। प्रथमचरणस्य २०२३ तमस्य वर्षस्य नवम्बरमासस्य २ दिनाङ्के, द्वितीयचरणस्य २०१४ तमस्य वर्षस्य जनवरीमासस्य १३ दिनाङ्के च राज्ये सर्वत्र चयनितशिक्षकाणां नियुक्तिपत्राणि दत्तानि।

# मोतिहारीपुलिसस्य महती सफलता चतुर्लक्षरूप्यकाणां कृत्रिमधनेन मादकद्रव्यैः च सह चत्वारः गृहीताः



हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी
मोतिहारीपुलिसः गुप्तसूचनायाः आधारेण कृत्रिमधनस्य, मादकद्रव्याणां च विरुद्धं महती कार्यवाहीम् अकरोत्। गुप्तसूचनायाम् रक्सौल डीएसपी इत्यस्य नेतृत्वे पुलिसैः ४.१३ लक्षरूप्यकाणां कृत्रिमरूप्यकैः सह चत्वारि तस्कराणि गृहीताः। गृहीतस्य तस्करस्य नकलीधनस्य, मादकद्रव्याणां च मुद्रणार्थं कागदं, कारतूसं च गृहीतम् अस्ति, गृहीताः सर्वे तस्कराः सिवानमण्डलस्य इति कथ्यते। पुलिसः गृहीतस्य तस्करस्य प्रश्नोत्तरे व्यस्तः अस्ति। मोतिहारी पुलिस- अधीक्षकः कन्तेशकुमारमिश्रः पत्रकारान् सम्बोधयन् अवदत् यत् तस्कराः नकलीरूप्यकमस्य विशालं मालम् गृहीत्वा नगरे प्रवेशं कर्तुं गच्छन्ति इति गुप्तसूचना प्राप्ता। अस्य विषये रक्सौलनगरे पुलिसउपाधीक्षकः धीरेन्द्रकुमारः नेतृत्वे एस. आई. टी वाहनम् एकः तस्करः नकलीनोट्, मादकद्रव्याणि च सह गृहीतः। गृहीतस्य तस्करस्य आज्ञानुसारं छापे रक्सौल- सिवाननगरयोः नकली-मुद्रा- मुद्रणार्थं सामग्रीभिः सह त्रयः अपि तस्कराः गृहीताः। गृहीतस्य तस्करस्य परिचयः सिवानमण्डलस्य नगरपुलिसस्थानक्षेत्रस्य निवासी इति ज्ञातम्। मो. यूसुफः, उर्फ पप्पूः, रवि कुमारः, इति ज्ञातम्। एकलक्ष ४५ सहस्ररूप्यकाणां १०० रुप्यकाणां संग्रहणं कृतम्। 1.20 किलोग्राम चरसः, कृत्रिममुद्रामुद्रणार्थं 3 कागदस्य बण्डलः, 08 कारतूसः,पत्रं यन्त्रम् अयसकर्तरी आदयः। गृहीतस्य अधीनं रक्सौलनगरे पुलिस- उपाधीक्षकः धीरेन्द्र कुमारः, पुआनीएकतासागरः, इंदरजीत पासवानः, मनीष कुमारः, चंदन कुमारश्च आसीत्।



## ।। श्रीरामायणकथा ।।

**लङ्काकाण्डम्!** (द्विषष्टितमः सर्गः)
पुष्पकविमानेन श्रीरामचन्द्रस्य अयोध्यायात्रा, भरद्वाजगुहादिभिः सह च साक्षात्कारः। (अष्टमः खण्डः)

हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

अपरत्र राज्ञः दशरथस्य सचिवाः (अशोकः, विजयः, सिद्धार्थश्च) पुरोहितं पुरस्कृत्य रामस्य वृद्ध्यर्थं नगरस्य च वृत्त्यर्थं मन्त्रणम् अकुर्वन्। ततः पुरोहितः मन्त्रिणश्च तथा कर्तुं सर्वान् आदिश्य रामस्य दर्शनार्थं तूर्णं नगरात् निरगच्छन्। अन्यत्र च इन्दवत् श्रीरामः उत्तमं रथम् आस्थाय नगरं प्रति गच्छति स्म। तदानी भरतः अश्वरज्जुं शत्रुघ्नः च छत्रम् अगृह्णात्। लक्ष्मणः तस्य शिरसि व्यजनं भ्रमयति स्म, राक्षसराजः विभीषणः च अपरं चन्द्रसंङ्काशं श्वेतं बालव्यजनं गृहीत्वा रामस्य समीपे उपाविशत्। तदानीं देवाः ऋषयः च रामस्य स्तुतिं कर्तुम् आरभन्त। ततः शत्रुञ्जयं नाम गजम् आरुह्य वानरराजः सुग्रीवः गच्छति स्म। अन्ये वानराः च मानुषं विग्रहं कृत्वा गजानां नवसहस्राणि आस्थाय गच्छन्ति स्म। एवमेव पुरुषव्याघ्रः रामचन्द्रः सर्वैः सह शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निःस्वनैः तां पुरी प्राविशत्। तदा हृष्टाः पौराः सर्वे रथे स्थितं श्रीरामम् अपश्यन्।

ततः रामचन्द्रः रथात् अवतीर्य मन्त्रिभिः सह उपविश्य सुग्रीवेण सह मित्रता, पवनपुत्रस्य क्षमता, अन्येषां वानराणाम् अद्भुतं वीरत्वम् इति विषये विस्तरेण आख्यातुम् आरभत। राक्षसानां बलं वानराणां च अद्भुतं कार्यं श्रुत्वा अयोध्यावासिनः अत्यन्तं विस्मिताः अभवन्। ततः रामचन्द्रः पितुः दशरथस्य भवनं प्रविश्य मातृणां कौशल्याकैकेयीसुमित्राणाम् अभिवादनम् अकरोत्। ततः परं श्रीरामः भरतम् आहूय अब्रवीत् - मुक्तावैदुर्यसङ्कीर्णं यच्च महत् सशोकवनिकं सुग्रीवाय निवेदय। रामस्य आज्ञानुसारं भरतः तथैव कृत्वा सुग्रीवम् अब्रवीत् हे वानरराज! रामस्य अभिषेकाय शीघ्रं दूतान् आज्ञापय। भरतस्य आदेशं श्रुत्वा सुग्रीवः वेगवतः चतुरः वानरान् आहूय तेभ्यः सर्वरत्नविभूषितान् चतुरः घटान् दत्त्वा चतुर्णां समुद्राणां जलम् आनेतुम् आदिशत्।

सुग्रीवस्य आदेशेन वीरः हनुमान्, जाम्बवान्, वानरः गवयः, ऋषभश्च घटान् आदाय गरुडाः इव शीघ्रगाः तूर्णं गगनम् उदपतन्। वानरपुङ्गवः ऋषभः घटेन नदीशतानां पञ्चानां जलम् आनयत्। सत्त्वसम्पन्नः सुषेणः सर्वरत्नविभूषितेन घटेन पूर्वात् समुद्रात् जलम् आनयत्। ऋषभः रक्तचन्दनकर्पूरैः संवृतेन काञ्चनघटेन दक्षिणात् सागरात् जलम् आनयत्। गवयः पश्चिमात् सागरात् जलम् आनयत्। अपिच मारुतात्मजः सर्वगुणान्वितः धर्मात्मा हनुमान् महता रत्नकुम्भेन उत्तरात् सागरात् जलम् आनयत्। ततः तैः वानरश्रेष्ठैः आनीतं तज्जलं दृष्ट्वा रामस्य अभिषेकाय सचिवैः सह शत्रुघ्नः श्रेष्ठाय पुरोहिताय सुहृद्भ्यश्च न्यवेदयत्।

## संस्कृतमातुः सेवार्थं आत्मानं समर्पयामः

नमांसि, संस्कृतकार्यसाधनार्थं कार्यकर्तारः अपेक्षिताः एव। ' सर्वे अधिकाधिकं समयं दद्युः, अधिकाः जनाः सर्वं समयं दद्युः' इति ज्येष्ठानां मार्गदर्शनानुसारं संस्कृतं स्थानं स्थानं नेतुं प्रतिगृहं प्रतिहृदयं च प्रापयितुम् अधिकाधिकाः युवानः पूर्णं समयं समर्पयेयुः।प्रत्येकं संस्कृतच्छात्रः स्वस्य विद्याभ्यासस्य अनन्तरम्,उद्योगप्रवेशात् पूर्वम् न्यूनातिन्यूनम् एकं वर्षं संस्कृताय समर्पयेत्। वेतनेन विना, अन्यव्यक्तिगत-आकाङ्क्षाः विना पूर्णसमर्पणभावेन भारते यत्र कुत्रापि सूचितं यत्किमपि संस्कृतकार्यं कर्तुम् अग्रे आगच्छेत्।यदि प्रत्येकं संस्कृतच्छात्रः एतादृशं स्वल्पं चेदपि महत्वभूतं त्यागं करोति तर्हि द्वित्रेषु वर्षेषु एव वयं महती सिद्धिं प्राप्तुं शक्नुयाम। मित्राणि, संस्कृतमातुः सेवार्थं आत्मानं समर्पयामः।

**"मातस्त्वत्तो वित्तं चित्तं**
**स्वत्वं प्रतिभा देहबलम्**
**नाहं कर्त्ता, कारयसि त्वं,**
**निःस्पृहता मम कर्मफले ।**
**अर्पितमेतद् जीवनपुष्पं**
**मातस्तवशुभपादतले**
**नान्यो मन्त्रो नान्यचिन्तनं**
**नान्यद्देशहिताद्धि ऋते ॥**

"जयतु संस्कृतं जयतु भारतम्।

**प्रो. विजयकुमारः मेनन्**
**कुलपतिः**
**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः**
**उज्जयिनी ,मध्यप्रदेशः।**



## प्रवेशसूचना

हिमसंस्कृतवार्ता:

विश्वस्थली (वसोहली), कठुआ, जम्मूकश्मीर प्रान्ते पूर्णतः आवासीय तथा गुरुकुलपरंपरया प्रचलितेन चूड़ामणिसंस्कृत संस्थानेन शैक्षिक वर्ष २०२४-२५ कृते प्रथमाकक्षाया निमित्तं आवेदनपत्रमाह्वयते । अतः अभिप्सवः छात्राः आवेदनकर्त्तुं अर्हन्ति। छात्राः आवेदन पत्रं दिनांकः - ०५/०२/२०२४ तः २४/०२/२०२४ भारतीय डाक विभागेन अथवा स्वयम् उत्त वैदुतिक संकेत माध्यमेन प्रेषयितुं शक्नुवन्ति। संम्पूर्ण विवरणं अधः पश्यन्तु।

**डॉ सौम्य रञ्जन महापात्र, प्राचार्य चूड़ामणि संस्कृत संस्थान विश्वस्थली 8328873759**
churamanisanskritsansthan@gmail.com

## विश्वकर्कदिवसः




डॉ नरेन्द्रराणा सिरमौरः

कर्करोगविषये जागरूकतां जनयितुं तस्य निवारणं, अन्वेषणं, चिकित्सां प्रोत्साहयितुं च फरवरीमासस्य चतुर्थदिनाङ्के विश्वकर्कदिवसः आचर्यते । विश्वकर्कदिवसः, २००८ तमे वर्षे लिखितस्य विश्वकर्कघोषणायाः लक्ष्याणां समर्थनायान्तार्राष्ट्रीयकर्कनियन्त्रणसङ्घस्य नेतृत्वे क्रियते। विश्वकर्कदिवसस्य प्राथमिकं लक्ष्यं कर्करोगस्य न्यूनीकरणं, रोगजन्यमृत्युः च न्यूनीकर्तुं वर्तते। अवधेयं वर्त्तते यत् बहवः जनाः कर्करोगस्य निवारणाय आध्यात्मिकतायाः साहाय्यं अपि गृह्णन्ति।

### इतिहासः

१९३३ तमे वर्षे अन्तार्राष्ट्रीयकर्कनियन्त्रणसङ्घः स्विट्ज़रलैंडदेशस्य जेनेवानगरे प्रथमवारं विश्वकर्कदिवसम् आचरितवान् । अयं दिवसः कर्करोगविषये जागरूकतां जनयितुं, जनान् शिक्षितुं, विश्वस्य सर्वकारान् व्यक्तिविशेषज्ञ अस्य रोगस्य विरुद्धं प्रत्यभिज्ञातुं, प्रतिवर्षं कोटिजनानां मृत्योः उद्धाराय च आचर्यते।

### वर्तमानस्थितिः

सम्प्रति विश्वे प्रतिवर्षं ७६ लक्षं जनाः कर्करोगेण मृताः भवन्ति, येषु ४० लक्षं जनाः अकालं (३०-६९ वर्षाणि) म्रियन्ते । अतः अस्य रोगस्य विषये जागरूकतां वर्धयितुं , कर्करोगस्य निवारणार्थं व्यावहारिकरणनीतयः विकसितुं अस्मिन् विषये प्रचारस्य आवश्यकता अस्ति। २०२५ तमे वर्षे कर्करोगेण अकालमृत्युः प्रतिवर्षं ६० लक्षं यावत् वर्धते इति अनुमानितम् अस्ति । यदि विश्वस्वास्थ्यसङ्गठनस्य २०२५ तमे वर्षे कर्करोगेण अकालमृत्युः २५ प्रतिशतं न्यूनीकर्तुं लक्ष्यं सिद्धं भवति तर्हि प्रतिवर्षं १५ लक्षं जनानां प्राणाः रक्षितुं शक्यन्ते।

### अस्य वर्षस्य विषयः

प्रतिवर्षं विश्वकर्कदिवसस्य कृते एकः विषयः चयनितः भवति। अस्मिन् वर्षे विषयः अस्ति “Close the Care Gap: Everyone Deserves Access to Cancer Care” इति । अस्य विषयस्य साहाय्येन सर्वेषां कर्करोगरोगिणां कृते सुलभतया चिकित्सां प्राप्तुं अवसरः प्राप्यते इति सुनिश्चित्य बलं दत्तम् अस्ति । पाश्चात्यदेशानाम् आर्थिकदृष्ट्या दुर्बलदेशानां च रोगिणः प्रायः कर्करोगस्य उत्तमां चिकित्सां प्राप्तुं न शक्नुवन्ति। अतः अस्य पूर्त्यै एषः विषयः चयनितः अस्ति। अस्य उपविषयः अस्ति यत् “वयं मिलित्वा अस्मिन् विषये कार्यं कुर्मः” इति । अस्य उपविषयस्य साहाय्येन कर्करोगस्य उन्मूलनार्थं संसाधनं प्रदातुं नेतारः उत्तरदायित्वे बलं दत्तम् अस्ति।

हिमसंस्कृतवार्ता:



## भगवद्गीतातत्त्वम्

मोहकारणतः हि मनुष्यः किं कर्तव्यं किं न इति द्विविधायां निपतति । मनुष्यः आत्मकल्याणं तु इच्छति, परं मोहासक्तिकारणतः संसारे बद्धः भवति । शास्त्राज्ञानुसारं यदि स्वकर्तव्यस्य पालनं कुर्यात्, फलेषु निर्विकारत्वं गच्छेत् तर्हि सः द्विविधातः मुक्तिं प्राप्तुमर्हति । अन्तःकरणे शरीरं विनाशशीलम्, आत्मा च अविनाशी इति स्पष्टता आवश्यकी । लोकसङ्ग्रार्थं, शरीरयात्रार्थमपि समर्पणबुद्ध्या कर्म तु करणीयमेव । जडतातः सम्बन्ध-विच्छेदः यदा भवति तदा तत्त्वज्ञानं स्वयं प्राप्यते । मनुष्येषु समभावयुक्तः मनुष्यः श्रेष्ठः। समत्वं नाम योगः इति । वस्तुतः विश्वं हि भगवद्रूपं वर्तते । मनुष्यमात्रं भगवत्प्राप्तेः अधिकारी इति गीता वदति । गीतोक्तैः कर्मज्ञानभक्तियोगसाधनैः मनुष्यः ईश्वरसाक्षात्कारस्य पात्रं भवति इति गीतोपदेशः।

स्वत्त्वं, रजः, तमः चेति प्रकृतितः समुद्भवाः त्रिगुणाः कथ्यन्ते । जीवः परमात्मनः अंशभूतः । स एतान् गुणान् धृत्वा प्रपञ्चे प्रवर्तते, रमते, खिन्नतां गच्छेद् वा । सत्त्वं सुखकारकं, रजः कर्मासक्त्यादिषु नियोजकं, तमश्च अज्ञानक्लेशादिकारकम् । एतैः गुणैः जीवः सदा आवृत्तो भवति । परन्तु परमात्मा एतेभ्यः सर्वथा मुक्तः, निष्कलङ्कश्च स्यात्सदैव । एते गुणा हि जीवस्य सदसत्सु योनिषु जन्मनः कारणं भवन्ति । कस्मिंश्चन जने यदा कदाचित् एतद्गुणत्रयं परस्परं न्यूनाधिक्यत्वेन तिष्ठति, अर्थात् परिवर्तते । अतः तस्य भावोऽपि तद्गुणानुसारं जायते । कथञ्चित् दैवात् वा कश्चन एतेभ्यो गुणेभ्यः पारं गच्छेत् तदा हि स परमात्मनम् अनुभवेत्, प्राप्नुयाद् वा । अन्यथा सः सदा गुणेषु हि ओतःप्रोतत्वेन तिष्ठेत् ।

अत एते प्रकृतिगुणा हि प्रपञ्चस्य परिचालकाः स्युः, परमात्मा चेदत्र निर्लिप्तः स्यात् । जीवः प्रकृतिपुरुषयोः मध्ये सन्तिष्ठते इति, शुभम् ।

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः